॥ वाल्मीकि रामायण॥

२ अयोध्याकाण्ड

अध्याय ८६

ततस्तां रजनीमुष्य भरतः सपरिच्छदः ।
कृतातिथ्यो भरद्वाजं कामादभिजगाम ह ॥१॥

तमृषिः पुरुषव्याघ्रं प्रेक्ष्य प्राञ्जलिमागतम् ।
हुताग्निहोत्रो भरतं भरद्वाजोऽभ्यभाषत ॥२॥

कच्चिदत्र सुखा रात्रिस्तवास्मद्विषये गता ।
समग्रस्ते जनः कच्चिदातिथ्ये शंस मेऽनघ ॥३॥

तमुवाचाञ्जलिं कृत्वा भरतोऽभिप्रणम्य च ।
आश्रमादभिनिष्क्रन्तमृषिमुत्तम तेजसं ॥४॥

सुखोषितोऽस्मि भगवन्सम्यग्बलवाहनः ।
तर्पितः सर्वकामैश्च सामात्यो बलवत्त्वया ॥५॥

अपेतक्रमसन्तापाः सुभक्ष्याः सुप्रतिश्रयाः ।
अपि प्रेष्यानुपादाय सर्वे स्म सुसुखोषिताः ॥६॥

आमन्त्रयेऽहं भगवन्कामं त्वामृषिसत्तम ।
समीपं प्रस्थितं भ्रातुर्मैरेणेक्षस्व चक्षुषा ॥७॥

आश्रमं तस्य धर्मज्ञ धार्मिकस्य महात्मनः ।
आचक्ष्व कतमो मार्गः कियानिति च शंस मे ॥८॥

इति पृष्टस्तु भरतं भ्रातृदर्शनलालसं ।
प्रत्युवाच महातेजा भरद्वाजो महातपाः ॥९॥

भरतार्धतृतीयेषु योजनेष्वजने वने ।
चित्रकूटो गिरिस्तत्र रम्यनिर्दरकाननः ॥१०॥

उत्तरं पार्श्वमासाद्य तस्य मन्दाकिनी नदी ।
पुष्पितद्रुमसञ्छन्ना रम्यपुष्पितकानना ॥११॥

अनन्तरं तत्सरितश्चित्रकूटश्च पर्वतः ।
ततो पर्णकुटी तात तत्र तौ वसतो ध्रुवम् ॥१२॥

दक्षिणेनैव मार्गेण सव्यदक्षिणमेव च ।
गजवाजिरथाकीर्णां वाहिनीं वाहिनीपते ।
वाहयस्व महाभाग ततो द्रक्ष्यसि राघवम् ॥१३॥

प्रयाणमिति च श्रुत्वा राजराजस्य योषितः ।
हित्वा यानानि यानार्हा ब्राह्मणं पर्यवारयन् ॥१४॥

वेपमाना कृशा दीना सह देव्या सुमन्त्रिया ।
कौसल्या तत्र जग्राह कराभ्यां चरणौ मुनेः ॥१५॥

असमृद्धेन कामेन सर्वलोकस्य गर्हिता ।
कैकेयी तस्य जग्राह चरणौ सव्यपत्रपा ॥१६॥

तं प्रदक्षिणमागम्य भगवन्तं महामुनिम् ।
अदूराद्भरतस्यैव तस्थौ दीनमनास्तदा ॥१७॥

ततः पप्रच्छ भरतं भरद्वाजो दृढव्रतः ।
विशेषं ज्ञातुमिच्छामि मातॄणां तव राघव ॥१८॥

एवमुक्तस्तु भरतो भरद्वाजेन धार्मिकः ।
उवाच प्राञ्जलिर्भूत्वा वाक्यं वचनकोविदः ॥१९॥

यामिमां भगवन्दीनां शोकानशनकर्शिताम् ।
पितुर्हिं महिषीं देवीं देवतामिव पश्यसि ॥२०॥

एषा तं पुरुषव्याघ्रं सिंहविक्रान्तगामिनम् ।
कौसल्या सुषुवे रामं धातारमदितिर्यथा ॥२१॥

अस्या वामभुजं श्लिष्टा यैषा तिष्ठति दुर्मनाः ।
कर्णिकारस्य शाखेव शीर्णपुष्पा वनान्तरे ॥२२॥

एतस्यास्तौ सुतौ देव्याः कुमारौ देववर्णिनौ ।
उभौ लक्ष्मणशत्रुघ्नौ वीरौ सत्यपराक्रमौ ॥२३॥

यस्याः कृते नरयाघ्रौ जीवनाशमितो गतौ ।
राजा पुत्रविहीनश्च स्वर्गं दशरथो गतः ॥२४॥

ऐश्वर्यकामां कैकेयीमनार्यामार्यरूपिणीम् ।
ममैतां मातरं विद्धि नृशंसां पापनिश्चयाम् ।
यतोमूलं हि पश्यामि व्यसनं महदात्मनः ॥२५॥

इत्युक्त्वा नरशार्दूलो बाष्पगद्गदया गिरा ।
स निशश्वास ताम्राक्षो क्रुद्धो नाग इवासकृत् ॥ २६ ॥

भरद्वाजो महर्षिस्तं ब्रुवन्तं भरतं तदा ।
प्रत्युवाच महाबुद्धिरिदं वचनमर्थवत् ॥ २७ ॥

न दोषेणावगन्तव्या कैकेयी भरत त्वया ।
रामप्रव्राजनं ह्येतत्सुखोदर्कं भविष्यति ॥ २८ ॥

अभिवाद्य तु संसिद्धः कृत्वा चैनं प्रदक्षिणम् ।
आमन्त्र्य भरतः सैन्यं युज्यताम् इत्यचोदयत् ॥ २९ ॥

ततो वाजिरथान्युक्त्वा दिव्यान्हेमपरिष्क्रितान् ।
अध्यारोहत्प्रयाणार्थी बहून्बहुविधो जनः ॥ ३० ॥

गजकन्यागजाश्चैव हेमकक्ष्याः पताकिनः ।
जीमूता इव घर्मान्ते सघोषाः सम्प्रतस्थिरे ॥ ३१ ॥

विविधान्यपि यानानि महानि च लघूनि च ।
प्रययुः सुमहार्हाणि पादैरेव पदातयः ॥ ३२ ॥

अथ यानप्रवेकैस्तु कौसल्याप्रमुखाः स्त्रियः ।
रामदर्शनकाङ्क्षिण्यः प्रययुर्मुदितास्तदा ॥ ३३ ॥

स चार्कतरुणाभासां नियुक्तां शिबिकां शुभाम् ।
आस्थाय प्रययौ श्रीमान्भरतः सपरिच्छदः ॥ ३४ ॥

सा प्रयाता महासेना गजवाजिरथाकुला ।
दक्षिणां दिशमावृत्य महामेघ इवोत्थितः ।
वनानि तु व्यतिक्रम्य जुष्टानि मृगपक्षिभिः ॥ ३५ ॥

सा सम्प्रहृष्टद्विपवाजियोधा
वित्रासयन्ती मृगपक्षिसङ्घान् ।
महद्वनं तत्प्रविगाहमाना
रराज सेना भरतस्य तत्र ॥ ३६ ॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com